# चतुर्थः पाठः

# एष धर्मः सनातनः।

## आमुखम्

जीवितायोधने अवश्यं बोधनीयानां मूल्यानां तत्वानां च भण्डार एव सुभाषितानि। 'किं कर्तव्यं किमकर्तव्यम्' इति विषये जनानां मार्गनिर्देशं कुर्वन्ति सुभाषितानि। गद्यपद्यमयानि बहूनि सुभाषितानि संस्कृतसाहित्ये निबद्धानि दृश्यन्ते। भर्तृहरिः, विष्णुशर्मा, नारायणपण्डितः, चाणक्यः, चरकः इत्यादयः अत्र प्रातस्मरणीयाः। परोपकारस्य, विद्यायाः, सत्यस्य च महत्वं, दुर्जनदोषः च चतुर्भिः सुभाषितैः अत्र उपवर्ण्यते। सुभाषितानि ललितपदानां प्रयोगैः आशयग्रहणाय प्रकटनाय च छात्रान् परिशीलयितुं उपयुज्यन्ते। अतः तेषां श्रवणं, पठनं, कण्ठस्थीकरणं च छात्रैः अवश्यं करणीयम्। छात्राः परोपकारे तत्पराः, विद्यायां कुतुकिनः,सत्यसन्धाः दुर्जनसम्पर्के तात्पर्यरहिताः भवन्तु  इत्यर्थमेवायं पाठभागः।

**पाठस्य नाम - एष धर्मः सनातनः।**

**आशयः - सत्यसन्धता, परोपकारसन्नद्धता च।**

**उद्देश्यम् - छात्रेषु परोपकारसन्नद्धतां, सत्यसन्धतां च जनयति।**

**नैपुणी - सुभाषितानाम् आशयं स्वांशीकरोति।**

**आधारग्रन्थसूची - सुभाषितामृतं, सुभाषितरत्नावली।**

**कालांशः - १२**

| आशयाः / धारणाः/ व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| सुभाषितानि जीवितविजयाय अत्यन्तमुपकुर्वन्ति। एष धर्मः सनातनः। सुभाषितम्। | सतालालपनम्, क्रियापदानां चयनं, सुभाषितचयनं,आप्तवाक्यानां चयनं, विभक्तिरूपाणां विविच्य लेखनं, चतुर्थीपञ्चमीविभक्त्योः विवेचनम्। | सतालमालपति। सारांशं वदति। आशयानुसारं सुभाषितानि निर्धारयति। क्रियापदानि विवेचयति। आप्तवाक्यानि चित्वा लिखति। चतुर्थीपञ्चमीविभक्ती विवेचयति। |

पुरा वृन्दावने अनावृष्टिः संजाता। वृक्षलतादयः शुष्काः अभवन्। जलदौर्लभ्यात् तृणाभावः, तेन धेनवः अपि क्लिष्टाः अभवन्। समीपस्थायां कालिन्दीनद्यां आवश्यकं जलमासीत्। जनानां दुरवस्थां दृष्ट्वा बलरामः एकां कुल्यां निर्माय कालिन्दीजलं केदारेषु वाहयति स्म। जलसौलभ्येन जनाः धेनवः च सन्तुष्टाः अभवन्। प्रकृतीः सस्यश्यामलकोमला संजाता। वृन्दावनवासिनां रक्षको भूत्वा जनान् रक्षति स्म बलरामः, यतः स्वप्रजापरिपालनं राज्ञां धर्मः आसीत्। अतः 'एष धर्मः सनातनः' इति धर्मप्रतिपादकं सुभाषितपाठभागं श्रद्धया वाचनं कुर्वन्तु इति निर्दिशतु।

**प्रवर्तनम् १- तालात्मकवाचनम्।**

**उद्देश्यम् - सतालालपनसामर्थ्यम्।**

**प्रक्रिया**

छात्राणां वाचननन्तरं अध्यापिका उचिततालेन साकं सुस्वरेण आदर्शवाचनं करोतु। अध्यापिकायाः आदर्शवाचनानन्तरं पुनरपि वाचनाय द्वित्राणां छात्राणां अवसरं ददातु। छात्राणां वाचनवेलायां ये ये छात्राः वाचनाय क्लेशमनुभवन्ति इति निरीक्ष्य तेषाम् उद्धारणाय चतुरङ्गसङ्घान् रूपवत्करोतु। प्रथमसङ्घः आदिमपद्यस्य प्रथमपादः, द्वितीयः द्वितीयपादः, तृतीयः तृतीयपादः, चतुर्थः चतुर्थपादः इति रीत्या सतालालपनाय सङ्घे स्थितानां छात्राणां अवसरं ददातु। एकस्य सङ्घस्य अवतारणसमये इतरसङ्घः मूल्यनिर्णयमपि कुर्वन्तु।

**मूल्यनिर्णयसूचिकाः।**

तालात्मकता।

अक्षरव्यक्तता।

उचितभावः।

मूल्यनिर्णयानन्तरं यस्य सङ्घस्य आलपनम् उत्तमं भवति स सङ्घः अभिनन्दनीयः।

**प्रवर्तनम् २ - क्रियापदचयनम्।**

**उद्देश्यम् - क्रियापदविवेचनम्।**

**प्रक्रिया**

अस्माकं पद्यभागेषु अनेकानि क्रियापदानि प्रयुक्तानि सन्ति। तानि कानि इति जानन्ति वा? इति प्रश्नमवतार्य कथनाय छात्राणाम् अवसरं ददातु। छात्राणां प्रतिकरणानि श्यामफलके विलिख्य स्खालित्यनिवारणं कृत्वा क्रोडीकरोतु।

**यथा -**

फलन्ति, वहन्ति, दुहन्ति, वर्धते, ब्रूयात्।

**मूल्यनिर्णयसूचिकाः।**

उचितपदचयनम्।

विविच्य ज्ञानम्।

अक्षरशुद्धिः।

**प्रवर्तनम् ३ - आशयानुसारं सुभाषितलेखनम् ।**

**उद्देश्यम् - आशयावबोधः।**

**प्रक्रिया**

पाठभागः सम्यक् ज्ञातो वा? ज्ञातः चेत्, अधो दत्ते वाक्ये पठित्वा तदाशययुक्तं सुभाषितं लिखामः इत्युक्त्वा लेखनाय निर्दिशतु। लिखितानि सुभाषितानि कक्ष्यायाम् अवतारयन्तु छात्राः। तस्मिन्नवसरे अध्यापकः तद् श्यामफलके लिखतु। अनन्तरं छात्राणां टिप्पणिपुस्तकानि परस्परं विनिमाय दत्वा परस्परमूल्यानिर्णयं कारयतु।

यथा -

आशयः - नद्यः अन्येभ्यः जलं यच्छन्ति।

आशययुक्तः श्लोकः - परोपकाराय फलन्ति नद्यः।

आशयः - प्रियं चेदपि असत्यं न वक्तव्यम्।

आशययुक्तः श्लोकः - सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।

**मूल्यनिर्णयसूचिकाः।**

आशयबन्धः।

अनुयोज्यता।

अक्षरव्यक्तता।

**प्रवर्तनम् ४ - आप्तवाक्यचयनम् ।**

**उद्देश्यम् - आप्तवाक्यानां परिचायनम्।**

**प्रक्रिया**

सर्वे सुखिनः वा इति प्रश्नमवतार्य प्रतिकरणं श्रुत्वा अस्माकं पाठभागे, लोके च बहुनि आप्तवाक्यानि सन्ति। आप्तवाक्यानि सदा सत्यवाक्यानि सन्ति। यथा सत्यमेव जयते, सत्यं शिवं सुन्दरम् इत्यादीनि आप्तवाक्यानि भवन्ति। यूयमपि आप्तवाक्यानि वदथ! इत्युक्त्वा आप्तवाक्यकथनाय निर्दिशतु। छात्राणाम् उत्तरकथनसमये तत्सर्वम् अध्यापिका श्यामफलके लिखतु। छात्राणां प्रतिकरणानन्तरं पाठभागं निरीक्ष्य तत्रान्तर्गतानि आप्तवाक्यानि वैयक्तिकतया लेखनाय निर्दिशतु। तेषां लेखनानन्तरं परस्परमूल्यनिर्णयमपि कारयतु।

**मूल्यनिर्णयसूचिकाः।**

आशयावगमनम्।

अनुयोज्यता।

अक्षरव्यक्तता।

परोपकाराय सतां विभूतयः।
सर्वाङ्गे दुर्जनो विषम्।
सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।
विद्याधनं सर्वधनात् प्रधानम्।

**प्रवर्तनम् ५ - विभक्त्यनुसारं वर्गीकरणम्।**

**उद्देश्यम् - विभक्तिपरिचयः।**

**प्रक्रिया**

अस्माभिः पूर्वासु कक्ष्यासु तृतीयाविभक्तिपर्यन्तं पदानि पठितवन्तः। यथा -

| प्रथमा | द्वितीया | तृतीया |
|---|---|---|
| बालः | बालं | बालेन |
| रमा | रमां | रमया |
| वनं | वनं | वनेन |
| बालः बालौ बालाः | रमा रमे रमाः | वनं वने वनानि |
| बालं बालौ बालान् | रमां रमे रमाः | वनं वने वनानि |
| बालेन बालाभ्यां बालैः | रमया रमाभ्यां रमाभिः | वनेन वनाभ्यां वनैः |

इत्यादिरीत्या विशदीकृत्य तेषां शब्दानां चतुर्थी - पञ्चमी विभक्तिरूपाणि च परिचाययतु। पुनः तेषां टिप्पणिपुस्तके क्रमशः लेखनाय अवकाशमपि ददातु।

यथा

| | | | |
|---|---|---|---|
| प्र | बालः | बालौ | बालाः |
| द्वि | बालं | बालौ | बालान् |
| तृ | बालेन | बालाभ्यां | बालैः |
| च | बालाय | बालाभ्यां | बालेभ्यः |
| प | बालात् | बालाभ्यां | बालेभ्यः |

तेषां दृढीकरणाय कक्ष्यातः एकं बालकम् उत्थाप्य अधः दत्तरीत्या साभिनयमवतार्यपञ्चमी विभक्तिपर्यन्तं कथनाय निर्दिशतु।

सः अनिलः - अत्र अनिलः इति प्रथमा।

अनिलम् आह्वयामि - अत्र अनिलम् इति द्वितीया।

अनिलेन पुस्तकं स्वीक्रियते - अत्र अनिलेन इति तृतीया।

अनिलाय पुस्तकं ददामि - अत्र अनिलाय इति चतुर्थी।

अनिलात् पुस्तकं स्वीकरोमि - अत्र अनिलात् इति पञ्चमी।

एवं रीत्या एकां बालिकाम् आहुय तत्रस्थं पुंलिङ्ग-स्त्रीलिङ्गशब्दानां रूपभेदमपि विविच्य ज्ञातुम् अवकाशं ददातु। तदनन्तरं छात्राः पाठपुस्तकस्य ३६तमे पुटे दत्तं पठनप्रवर्तनं कुर्वन्तु। छात्रान् सङ्घद्वयं कृत्वा एकस्य सङ्घस्य चतुर्थीति अपरस्य सङ्घस्य पञ्चमीति च नाम दत्वा पाठे दत्तम् उदाहरणमनुसृत्य पदानां वर्गीकरणार्थं निर्दिशतु। छात्राः गणशः उपविश्य परस्परचर्चया पदानि वर्गीकुर्वन्तु। पुनः यदा अध्यापकः पदानां प्रथमान्तरूपं वदति तदा प्रथमसङ्घेन चतुर्थीरूपं, द्वितीयगणेन पञ्चमीरूपं च वक्तव्यम्। अध्यापकः उचितरूपाणि लिखतु। पुनः सर्वे छात्राः स्वटिप्पणिपुस्तके तत् लिखन्तु। छात्राणां लेखनानन्तरं मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचिकाः।**

अनुयोज्यता।

विवेचनशेषिः।

अक्षरव्यक्तता।

**उदा-**

| चतुर्थी | पञ्चमी |
|---|---|
| परोपकाराय | सर्वधनात् |
| मोचनाय | नालिकायाः |
| रमायै | रोगात् |
| | तस्मात् |
| | यानात् |

**प्रवर्तनम् ६ - उदाहृतानुसारं पूरणम्।**

**उद्देश्यम् - विभक्तिविवेचनम्।**

**प्रक्रिया**

पाठपुस्तकस्थस्य पठनप्रवर्तनस्य निर्वहणाय निर्दिशतु। छात्राणां लेखनानन्तरम् अध्यापिका साधुरीत्या पूरणं कृत्वा प्रदर्श्य च स्वयं मूल्यनिर्णयाय निर्दिशतु।

**मूल्यनिर्णयसूचिकाः।**

विभक्तिप्रयोगसामर्थ्यम्।

अक्षरशुद्धिः।

**उदा-**

दीपः **प्रकाशाय** भवति।

औषधं **रोगशमनाय** भवति।

जनाः **यानात्** अवतरन्ति।

**नालिकायाः** जलं स्रवति।

धीरजः **विवेकात्** स्थूलतरः भवति।

**अनुबन्धः**

**सुभाषितसञ्चयः।**

१. आचार्यात्पादमादत्ते पादं शिष्यस्स्वमेधया।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च।।

२. विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्।।

३. परोपकारः कर्तव्यः प्राणैरपि धनैरपि।
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि।।

४. सुलभाः पुरुषाः लोके सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।।

५. उदये सविता रक्तो रक्तश्चास्तमये तथा।
सम्पत्तौ च विपत्तौ च महतामेकरूपता।।

६. विद्या प्रशंस्यते लोकैर्विद्या सर्वत्र गौरवम्।
विद्यया लभते सर्वं विद्वान् सर्वत्र पूज्यते।।

७. उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।

८. विदेशेषु धनं विद्या व्यसनेषु धनं मतिः।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम्।।

९. क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा।
न हि वशीकृतिर्लोके क्षमया किन्नसिध्यति।।

१०. गुशब्दस्त्वन्धकारः स्याद् रुशब्दस्तन्निरोधकः।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते।।

११. काकदृष्टिर्बकध्यानं श्वाननिद्रा तथैव च।
अल्पाहारो जीर्णवस्त्रमेतद्विद्यार्थिलक्षणम्।।

१२. हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम्।।

१३. दिवा पश्यति नोलूकः काको नक्तं न पश्यति।
विद्याविहीनो मूढस्तु दिवा नक्तं न पश्यति।।

१४. जलबिन्धुनिपातेन क्रमशः पूर्यते घटः।
गतिरेषा हि विद्यानां धर्मस्य च धनस्य च।।

१५. कामधेनुसमा विद्या सदैव फलदायिनी।
प्रवासे मातृवत्तस्मात् विद्या गुप्तं धनं स्मृतम्।।